শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥শ্রীকৃষ্ণাষ্টোত্তরশতনামস্তোত্রম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীকৃষ্ণাষ্টোত্তরশতনামস্তোত্রম্ ॥

ছাযাযাং পারিজাতস্য হেমসিংহাসনোপরি।
আসীনমম্বুদশ্যামমাযতাক্ষমলংকৃতম্॥

চন্দ্রাননং চতুর্বাহুং শ্রীৱতসাঙ্কিতৱক্ষসম্।
রুক্মিণীসত্যভামাভ্যাং সহিতং কৃষ্ণমাশ্রযে॥

শ্রীকৃষ্ণঃ কমলানাথো ৱাসুদেৱঃ সনাতনঃ।
ৱসুদেৱাত্মজঃ পুণ্যো লীলামানুষৱিগ্রহঃ॥ ১ ॥

শ্রীৱতসকৌস্তুভধরো যশোদাৱতসলো হরিঃ।
চতুর্ভুজাত্তচক্রাসিগদাশঙ্খাদ্যুদাযুধঃ॥ ২ ॥

দেৱকীনন্দনঃ শ্রীশো নন্দগোপপ্রিযাত্মজঃ।
যমুনাৱেগসংহারী বলভদ্রপ্রিযানুজঃ॥ ৩ ॥

পূতনাজীৱিতহরঃ শকটাসুরভঞ্জনঃ।
নন্দৱ্রজজনানন্দী সচ্চিদানন্দৱিগ্রহঃ॥ ৪ ॥

নৱনীতৱিলিপ্তাঙ্গো নৱনীতনটোনঘঃ।
নৱনীতনৱাহারো মুচুকুন্দপ্রসাদকঃ॥ ৫ ॥

ষোডশস্ত্রীসহস্রেশস্ত্রিভঙ্গী মধুরাকৃতিঃ।
শুকৱাগমৃতাব্ধীন্দুর্গোৱিন্দো যোগিনাং পতিঃ॥ ৬ ॥

ৱতসৱাটচরোনন্তো ধেনুকাসুরভঞ্জনঃ।
তৃণীকৃততৃণাৱর্তো যমলার্জুনভঞ্জনঃ॥ ৭ ॥

উত্তালতালভেত্তা চ তমালশ্যামলাকৃতিঃ।
গোপগোপীশ্বরো যোগী কোটিসূর্যসমপ্রভঃ॥ ৮ ॥

ইলাপতিঃ পরংজ্যোতির্যাদৱেন্দ্রো যদূদ্বহঃ।
ৱনমালী পীতৱাসাঃ পারিজাতাপহারকঃ॥ ৯ ॥

www.prapatti.com

গোৱর্ধনাচলোদ্ধর্তা গোপালঃ সর্ৱপালকঃ।
অজো নিরঞ্জনঃ কামজনকঃ কঞ্জলোচনঃ॥ ১০ ॥

মধুহা মথুরানাথো দ্বারকানাযকো বলী।
ৱৃন্দাৱনান্তঃ সঞ্চারী তুলসীদামভূষণঃ॥ ১১ ॥

স্যমন্তকমণের্হর্তা নরনারাযণাত্মকঃ।
কুব্জাকৃষ্ণাংবরধরো মাযী পরমপূরুষঃ॥ ১২ ॥

মুষ্টিকাসুরচাণূরমল্লযুদ্ধৱিশারদঃ।
সংসারৱৈরী কংসারির্মুরারির্নরকান্তকঃ॥ ১৩ ॥

অনাদিব্রহ্মচারী চ কৃষ্ণাৱ্যসনকর্ষকঃ।
শিশুপালশিরশ্ছেত্তা দুর্যোধনকুলান্তকঃ॥ ১৪ ॥

ৱিদুরাক্রূরৱরদো ৱিশ্বরূপপ্রদর্শকঃ।
সত্যৱাক্ সত্যসঙ্কল্পঃ সত্যভামারতো জযী॥ ১৫ ॥

সুভদ্রাপূর্ৱজো ৱিষ্ণুর্ভীষ্মমুক্তিপ্রদাযকঃ।
জগদ্গুরুর্জগন্নাথো ৱেণুনাদৱিশারদঃ॥ ১৬ ॥

ৱৃষভাসুরৱিধ্ৱংসী বাণাসুরকরান্তকঃ।
যুধিষ্ঠিরপ্রতিষ্ঠাতা বর্হিবর্হাৱতংসকঃ॥ ১৭ ॥

পার্থসারথিরৱ্যক্তো গীতামৃতমহোদধিঃ।
কালীযফণিমাণিক্যরঞ্জিতশ্রীপদাম্বুজঃ॥ ১৮ ॥

দামোদরো যজ্ঞভোক্তা দানৱেন্দ্রৱিনাশকঃ।
নারাযণঃ পরং ব্রহ্ম পন্নগাশনৱাহনঃ॥ ১৯ ॥

জলক্রীডাসমাসক্তগোপীৱস্ত্রাপহারকঃ।
পুণ্যশ্লোকস্তীর্থপাদো ৱেদৱেদ্যো দযানিধিঃ॥ ২০ ॥

সর্ৱতীর্থাত্মকঃ সর্ৱগ্রহরূপী পরাত্পরঃ।
এৱং শ্রীকৃষ্ণদেৱস্য নাম্নামষ্টোত্তরং শতম্॥ ২১ ॥

www.prapatti.com

কৃষ্ণনামামৃতং নাম পরমানন্দদাযকম্।
অত্যুপদ্রৱদোষঘ্নং পরমাযুষ্যৱর্ধনম্॥ ২২ ॥

॥ ইতি শ্রীকৃষ্ণাষ্টোত্তরশতনামস্তোত্রং সংপূর্ণম্ ॥

www.prapatti.com